International Journal of Sanskrit Research 2024; 10(4): 306-309

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2024; 10(4): 306-309
© 2024 IJSR
www.anantaajournal.com
Received: 02-06-2024
Accepted: 08-07-2024

**प्रतिमा-दास**
विद्यासागर विश्वविद्यालय, मिदनापुर, पश्चिम बंगाल, भारत

**डाँ. उत्तम-विश्वास**
विद्यासागर विश्वविद्यालय, मिदनापुर, पश्चिम बंगाल, भारत

**Corresponding Author:**
**प्रतिमा-दास**
विद्यासागर विश्वविद्यालय, मिदनापुर, पश्चिम बंगाल, भारत

# पार्श्वाभ्युदयदूतकाव्ये छन्दविचारः

**प्रतिमा-दास, डाँ. उत्तम-विश्वास**

**DOI:** https://doi.org/10.22271/23947519.2024.v10.i4e.2463

## प्रस्तावना

"छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते ।
ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते ।।"[1]

षट्सु वेदाङ्गेषु छन्दः अन्यतमम्। पाणिनीयशिक्षायामुक्तम्, छन्दः वेदपुरुषस्य पादौ स्तः। यदेव आनन्दमुत्पादयति तदेव छन्दः- 'चन्दयति आह्लादयतीति छन्दः'। पाणिनेः मतानुसारं आह्लादर्थकात् चन्द् इत्यस्मात् धातोः छन्दशब्दः निष्पन्नः। ऐतरेयारण्यके उच्यते- 'मानवान् पापकर्मभ्यः छादयन्ति छन्दांसि इति छन्दः।'[2] अर्थात् यदेव मनुष्यान् पापेभ्यः आच्छादयति तत् छन्दः। अतएव आच्छादनार्थे ऐतरेयारण्यके छन्दशब्दः व्यवहृतः। निरुक्तकारस्य यास्काचार्यस्य मतमस्ति- 'छादनात् छन्दः' इति। छन्दः द्विविधम्- वैदिकं लौकिकञ्चेति। लौकिकछन्दसां मूले एव वैदिकछन्दांसि। छन्दोबद्धपदं पद्यम् - अर्थात् चतुर्भिः पादैः चरणैः वा मेलनेन पद्यं सृज्यते। पद्यं द्विविधम्- वृत्तं जातिश्च। अक्षराणां निर्दिष्टसंख्यामनुसृत्य रचितं पद्यं वृत्तम्। वृत्तं भेदत्रयात्मकम् - समवृत्तम्, अर्धसमवृत्तं, विषमवृत्तं चेति। लौकिकेषु समवृत्तेषु इन्द्रवज्रा-उपेन्द्रवज्रा-उपजातिसमवृत्तादयः बहुछन्दांसि विद्यन्ते। अर्धसमवृत्तेषु पुष्पिताग्रा सुन्दरी चेति छन्दोद्वयं विद्यते। विषमवृत्तेषु अनुष्टुप् अन्यतमः।

रसानुकूलं वातावरणं निर्मातुं कवयः शृङ्गार-हास्य-शान्त-करुणादिषु रसेषु विभिन्नानां प्रकाराणां छन्दसां प्रयोगं कुर्वन्ति। काव्ये सामान्यतः रसानुसारं वर्ण्यविषयानुसारं च छन्दप्रयोगः दृश्यते। तदुच्यते-

काव्ये रसानुसारेण वर्णनानुगुणेन च ।
कुर्वीत सर्ववृत्तानां विनियोगं विभागवित् ।।[3]

---

[1] पाणिनीयशिक्षा- ४१ ।

[2] ऐतरेयारण्यकम्- २/१/६ ।

[3] सुवृत्ततिलकम्- ३/७ ।

विशेष-विशेष-रसप्रकाशनाय विशेष-विशेष-छन्दसः व्यवहारः लक्ष्यते। मेघदूतम् इति गीतिकाव्ये यथा शृङ्गाररसप्रकाशनार्थं कविः कालिदासः मन्दाक्रान्ताछन्दसः उपयोगः कृतः। मूलतः विरहभावनया रचितं काव्यमिदम्। मन्दं मन्दं आक्रान्ता इति मन्दाक्रान्ता। अर्थात् शनैः शनैः आक्रान्तत्वम् एव अस्य छन्दसः मूलम् उद्देश्यम्। यत्र काव्ये घटनाप्रवाहः शनैः शनैः दृढीभवन् अग्रेसरति तत्रैव मन्दाक्रान्ताछन्दसः प्रयोगः क्रियते कविभिः। अस्य छन्दसः लक्षणानुसारं यतिर्विचारः अपि एतादृशं मतं समर्थयति। अस्य छन्दसः लक्षणे अम्बुधिरसनगैः इति पददलेन पादस्य चतुर्थाक्षरात् अनन्तरं प्रथमयतिः, तदनन्तरं षडक्षरात् द्वितीययतिः, तदनन्तरं च सप्ताक्षरात् परं पादान्ते वा तृतीययतिः। अत्र यतिर्निर्णयकम् अक्षरक्रमम् अपि मन्दाक्रान्ताछन्दसः तादृशं वैशिष्ट्यं संसूचयति। किञ्च यत्र वर्षाकालस्य वर्णना, प्रवासीनायकः प्रवासिनी वा नायिका तत्रापि काव्ये मन्दाक्रान्ताछन्दसः उपयोगः दृश्यते। कालिदासकृतं मेघदूतं हि अत्रप्रसङ्गे समुदाहरणम्। मेघदूते वर्षाकालस्य वर्णना अस्ति। नायकयक्षस्य प्रणयिणी-विरही-वेदना क्रमेण शनैः शनैः वर्धमाना दृष्टा। तदुच्यते-

सुवशा कालिदासस्य मन्दाक्रान्ता प्रवल्गति ।
सदश्वदमकस्येव कम्बोजतुरगाङ्गना ।।[4]

अतः कविना कालिदासेन तत्र विरहिनः मनोवेदनां च प्रकटयितुं विप्रलम्भशृङ्गाररसोत्कर्षं जनयितुं मन्दाक्रान्ताछन्दसः प्रयोगः विहितः। अनुरूपम् एवं मेघदूतस्य श्लोकस्य समस्यापूर्तिरूपेण प्रणीते 'पार्श्वाभ्युदयम्' इति दूतकाव्येऽपि जिनसेनाचार्यः मन्दाक्रान्ताछन्दसः प्रयोगं कृतवान्। अस्मिन् काव्येऽपि वर्षणघटकमेघस्य वर्णना प्राप्यते। अत्रापि काव्ये गीतिमयत्वं कामदेवप्रभावत्वम् च लक्ष्येते। अत्रापि अग्रजस्य कमठस्य क्रमेण शनैः शनैः क्रोधप्रशमनम् इति घटनाप्रवाहः दृश्यते। अतः मन्दाक्रान्ताछन्दसः प्रयोगः स्वाभाविको एव। पार्श्वाभ्युदयम् इति काव्ये जिनसेनाचार्येण रसस्य तथा भावस्य अनुकूले एव मन्दाक्रान्ताछन्दः व्यवहृतम्। तथा च समस्यापूर्तिरचनां विहाय कवेः स्वरचिताः केचन श्लोकाः प्राप्यन्ते ये तावत् मालिनी-वसन्ततिलकछन्दोभ्याम् प्रणीताः। अधुना गङ्गादासस्य 'छन्दोमञ्जरी' इति ग्रन्थानुसारेण काव्यस्यास्य छन्दः आलोच्यते।

मन्दाक्रान्ता - विरहभावनां प्रकाशयितुं मन्दाक्रान्ताछन्दः अतीव योग्यछन्दः। इदं छन्दः खलु गम्भीरस्वभावयुक्तं वेदनामन्थरधीरगतियुक्तं च। अतः विरही-विरहिणी इत्यनयोः मनोभावं प्रकटयितुं कवयः एतत् छन्दः स्वीकुर्वन्ति। मन्दाक्रान्ताछन्दः भवति समवृत्तछन्दः। छन्दोमञ्जरी इति ग्रन्थे गङ्गादासेन अस्य छन्दसः लक्षणविषये उक्तम्-

"मन्दाक्रान्ताम्बुधिरसनगैर्मो भनौ तौ गयुग्मम्।"[5]

यत्र पद्यस्य प्रतिचरणम् एव सप्तदशाक्षराणि सन्ति। श्लोकस्य प्रत्येकं पादेषु यदि क्रमानुसारेण म-भ-न-त-त-ग-ग इत्येतेः गणाः विद्यमानाः दृश्यन्ते, तत्र मन्दाक्रान्ताछन्दो भवति। गङ्गादासस्य छन्दोमञ्जरीग्रन्थमनुसृत्य मन्दाक्रान्ताछन्दसः यः लक्षणमुक्तं तत्र यतिस्थानविषये यत् संकेतं प्रदत्तं तदत्र स्पष्टीक्रियते। लक्षणगतेन 'अम्बुधि' पदेन पादस्य आदितः चतुराक्षरात् परं यतिः विधेया। ननु अम्बुधि शब्दस्य समुद्रवाचित्वात् समुद्राणां च सप्तसंख्यकात् अम्बुधिपदेन सप्तसंख्या एव अवगन्तव्या। कथं तर्हि अम्बुधिपदेन अत्र लक्षणे चतुःअर्थः गृह्यते? अत्रोच्यते अम्बुधिशब्दस्य यथा समुद्रार्थः बहुल प्रसिद्धः तथैव 'चतुः संख्यान्वितः' इत्यर्थः अपि समुपलभ्यते वाचस्पत्यम् इति शब्दकोषे। अतः अम्बुधिशब्देन 'चतुः' अर्थग्रहणे नास्ति कापि बाधा। एवं रसशब्देन यथा दर्शनशास्त्रसिद्धरसानां ग्रहणं सम्भवति तथैव काव्ये गृहीतानां नवरसानां अपि ग्रहणं सम्भवेत्। कथं तर्हि अत्र "रसनाग्राह्यो गुणो रसः। स च मधुराम्ललवणकटुकषायतिक्तभेदात् षडविधः" [6] इति षडविधानां रसानां एव ग्रहणम् उच्यते। चरकादिशास्त्रे प्रसिद्धत्वात् एतेषामेव रसानां परामर्शेण रसशब्देन षड्संख्या अवगम्यते। एवं नगशब्देन सप्तसंख्या एव अत्र संसूच्यते। ननु ऋषीणां सप्तत्वात् समुद्रानां च सप्तत्वात् एते शब्दैः तत् पर्यायवाचिभिश्च सप्तसंखा अवगमनं स्वाभाविकं, कथं तर्हि अत्र नगशब्देन सप्तसंख्या अवगम्यते? अत्रोच्यते नगशब्देन स्थावराः पर्वताः अवगम्यते। किन्तु पर्वतानां संख्या नवैव इति प्रसिद्धिः सामान्यतः न लक्ष्यते। तथापि क्वचित् नगशब्देन सप्तकुलपर्वताः अवबोद्धन्ते। एते सप्तकुलपर्वताः हि- महेन्द्रः, मलयः, सह्यः, शुक्तिमान्, ऋक्षवान्, विन्ध्यः परिपात्रः चेति। अतः अत्र नगशब्देन सप्तसंख्या परामिष्ठा। अतएव अम्बुधिशब्देन चतुर्थाक्षरादनन्तरं, रसशब्देन षडक्षरादनन्तरं, नगशब्देन च सप्ताक्षरादनन्तरं यतिर्भवति। अर्थात् अस्मिन् छन्दसि आदौ चतुर्थे, अतःपरं दशमाक्षरे (४+६), तदनन्तरम् च सप्तदशाक्षरे (४+६+७) यतिः विद्यते। एकम् उदाहरणमत्र प्रदीयते-

म भ न त त ग ग

---

[4] सुवृत्ततिलकम्- ३/३४।

[5] छन्दोमञ्जरी- २/१६६।

[6] तर्कसंग्रहः,पृष्ठा- ८२।

श्रीमन्मू/ र्त्या मर/ कतम/ यस्तम्भ/ लक्ष्मीं व/ हन्त्या
योगैका/ ग्ग्रस्तिमि/ ततर/ या तस्थि/ वांसं नि/ दध्यौ ।
पार्श्वे दै/ त्यो नभ/ सि विह/रन् बद्ध/ वैरेण/ दग्धः
कश्चित् का/ न्ताविर/ हगुरु/ णा स्वाधि/ कारात्प्र/ मत्तः।।[7]

उपर्य्युक्तस्य श्लोकस्य प्रत्येकेषु पादेषु सप्तदशाक्षराणि सन्ति। एतस्य श्लोकस्य प्रतिपादे यथाक्रमेण म-भ-न-त-त-ग-ग एते गणाः विद्यन्ते। अतएव छन्दोमञ्जर्याः लक्षणानुसारमत्र मन्दाक्रान्ताछन्दः अभवत्। इत्थमेव चतुःसर्गात्मके काव्येऽस्मिन् अन्तिमान् षट्-श्लोकान् विहाय सर्वत्र मन्दाक्रान्ताछन्दो दृश्यते।
मालिनीछन्दः - पञ्चदशाक्षरात्मकं छन्दो मालिनीछन्दः। श्रीमता गङ्गादासेन अस्य लक्षणप्रसङ्गे उक्तवान्-

“ननमयययुतेयं मालिनी भोगिलोकैः।”[8]

अर्थात् यस्य श्लोकस्य प्रतिपादं यथाक्रमं न-न-म-य-य इत्येते गणाः विद्यन्ते चेत् मालिनीछन्दो भवति। अस्मिन् छन्दसि भोगिलोकैरिति पदेन यतिर्निर्देशिता। तथा भोगीशब्देन अष्टमाक्षरे तदनन्तरञ्च लोकशब्देन सप्तमाक्षरे यतिर्भवेत्। ननु कथं भोगिशब्देन अष्टाक्षरस्य बोधः? उच्यते भोगी नाम सर्पः नागो वा, शास्त्रेषु अष्टविध-नागानां प्रसिद्धिरस्ति। एते अष्टौ नागाः यथा- अनन्तनागः, वासुकिनागः, तक्षकनागः, पद्मनागः, महापद्मनागः, कुलीरनागः, कर्कूटनागः, शङ्खनागश्चेति। अतः भोगिशब्देन अष्टाक्षराणि बोध्यन्ते। भूर्भुवादीनां सप्तलोकानां प्रसिद्धत्वात् लोकशब्देन सप्ताक्षराणां बोधो भवति। एते सप्तलोकाः हि- भूः, भुवः, स्वः, महः, जनः,तपः,सत्यः चेति। निम्ने उदाहरणम् प्रदत्तम्।
न न म य य

अनुन/ यति स/ तीत्थं भ/ क्तिनम्रे/ ण मूर्ध्ना
कमठ/ दनुज/ नाथे ना/ गराज/ न्यसाक्षात् ।
ध्रुवम/ नुशय/ तप्ताद्वै/ रबन्ध/ श्चिरात्तः
स्मगल/ ति निज/ चित्तात्स/ न्तताश्रु/ च्छलेन ।।[9]

चतुर्थसर्गस्य ६६तमे श्लोके यथाक्रमं न-न-म-य-य इति एतेषां गणानां विद्यमानत्वात्, अष्टमाक्षरे पञ्चदशाक्षरे च यतिर्विधानात् मालिनीछन्दो भवेत्। इत्थं चतुर्थसर्गस्य ६७-७०तमे श्लोकेऽपि मालिनीछन्दो भवेत्।

वसन्ततिलकम् - चतुर्दशाक्षरात्मकमिदं छन्दः वसन्ततिलकम्। छन्दोमञ्जर्यां छन्दसोऽस्य लक्षणमेवमुक्तम्-

“ज्ञेयं वसन्ततिलकं तभजा जगौ गः।”[10]

श्लोकस्य प्रतिचरणं यथाक्रमं त-भ-ज-ज-ग-ग इति एते गणाः तिष्ठन्ति चेत् वसन्ततिलकछन्दः भवेत्। आलोच्येऽस्मिन् काव्ये वसन्ततिलकात्मकः श्लोकः यथा-
त भ ज ज ग ग

श्रीवीर/ सेनमु/ निपाद/ पयोज/ भृङ्गः
श्रीमान/ भूद्विन/ यसेन/ मुनिर्ग/रीयान् ।
तच्चोदि/ तेन जि/ नसेन/ मुनीश्व/ रेण
काव्यं व्य/ धायि प/ रिवेष्टि/ तमेघ/दूतम् ।।[11]

चतुर्थसर्गस्य अन्तिमे ७१तमे श्लोके यथाक्रमं त-भ-ज-ज-ग-ग इति गणानां एतेषां विद्यमानत्वात्, अन्ते च यतिः प्रयुक्तत्वात् लक्षणानुसारं वसन्ततिलकछन्दोऽस्ति।
जिनसेनाचार्येण स्वस्य प्रतिभाद्वारा मन्दाक्रान्ताछन्दसा ‘पार्श्वाभ्युदयम्’ इति दूतकाव्यं प्रणीतम्। कविः काव्यस्यास्य प्रत्येकं श्लोकान् मन्दाक्रान्ताछन्दसा विभूषितवान्। अतएव सः मन्दाक्रान्ताछन्दसः प्रयोगं कृत्वा काव्यं सजीवं कृतवान्। क्लिष्टशब्दानां प्रयोगे सति कुत्रापि काव्यस्य माधुरता न न्यूनीकृता। समस्यापूर्तिं विहायापि जिनसेनाचार्यः स्वस्य स्वतन्त्रकविकल्पनया कतिपयान् श्लोकान् रचितवान्, येषु श्लोकेषु तेन मालिनी-वसन्ततिलकछन्दसोः प्रयोगः कृतः।

**सहायकग्रन्थपञ्जी**


1. अन्नंभट्टः, तर्कसंग्रहः, सम्पा. ड. अनामिका-राय-चौधुरी, कलकाता, संस्कृत पुस्तक भाण्डार, १४०५ ।
2. आचार्यः जिनसेनः, पार्श्वाभ्युदयम् (श्रीयोगिराट् पण्डिताचार्यविरचितसुबोधिकाटीकासहितम्) ।
3. ऐतरेयारण्यकम् (सायणाचार्य्यविरचितवेदार्थप्रकाशनामधेयभाष्यसहितम्), श्रीराजेन्द्रलालमित्रेण परिशोधितम्, कलिकाताराजधान्यम्, १२८३ ।
4. केदारभट्टः, वृत्तरत्नाकरः, सम्पा. आचार्यः बलदेव-उपाध्यायः, वाराणसी, चौखम्बा सुरभारती प्रकाशन, चौखम्बा सुरभारती ग्रन्थमाला ८१ ।
5. पण्डितगङ्गादासः, छन्दोमञ्जरी, सम्पा. गुरुनाथविद्यानिधिभट्टाचार्यः, कलिकाता, संस्कृत पुस्तक भाण्डार, १४११ वङ्गाब्दः ।


[7] पार्श्वाभ्युदयम्- १/१ ।

[8] छन्दोमञ्जरी- २/१३४ ।

[9] पार्श्वाभ्युदयम्- ४/६६ ।

[10] छन्दोमञ्जरी- २/११२ ।

[11] पार्श्वाभ्युदयम्- ४/७१ ।

6. पण्डितगङ्गादासः, छन्दोमञ्जरी, सम्पा. डा. ब्रह्मानन्द-त्रिपाठी, वाराणसी, चौखम्बा सुरभारती प्रकाशन, चौखाम्बा सुरभारती ग्रन्थमाला ३६ ।
7. महाकविक्षेमेन्द्रः, सुवृत्ततिलकम्, सम्पा. श्री पं. व्रजमोहनझा, वाराणसी, चौखम्बा संस्कृत सीरीज आफिस, १९६८ ।